# संस्कृत-वार्ता:

दिनाङ्क : 23/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा नरेन्द्रमोदिना केरले अनेकानि विकासपरियोजनानि उद्घाटितानि, नूतनाश्च रेलयानसेवाः ध्वजप्रदर्शनपूर्वकं समारब्धाः, एन्. डी. ए. सर्वकारः सम्पर्कक्षेत्रे, विज्ञाने, नवीनतायां, स्वास्थ्यसेवायाञ्च महत्त्वपूर्णं निवेशं कुर्वन् अस्ति इति सः उक्तवान् ।

· आगामिषु अष्टादश-मासेषु भारतं स्वकीयं मोबाइल-ब्राण्ड इति प्रवर्तयिष्यति इत्यकथयत् सूचना-तन्त्रज्ञानमन्त्री अश्विनी वैष्णवः ।

· दावोस-नगरे पर्यावरण-अनुकूल-परिवहनस्य हरित-विमानयानस्य च क्षेत्रे सहकारं वर्धयितुं भारत-यूरोपीय-सङ्घौ सहमतौ स्तः।

· पाश्चात्यविक्षोभेन सम्पूर्णे उत्तरभारते दीर्घकालात् स्थापितः शुष्ककालः समापि‍तः। जम्मू-कश्मीरस्य, हिमाचलप्रदेशस्य, उत्तराखण्डस्य च केषुचित् भागेषु वर्षया सह हिमपात‍ः अभवत् ।

· क्रिकेट्-क्रीडायां, अद्य सायङ्काले रायपुर-नगरे पञ्च-टी-20-अन्ताराष्ट्रिय-शृङ्खलायाः द्वितीय-क्रीडायां भारतं न्यूज़ीलैण्ड्-देशेन सह क्रीडिष्यति ।

## पीएम-केरला यात्रा

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य केरलराज्यस्य तिरुअनन्तपुरम्-नगरे विविध-विकास-परियोजनाः उद्घाटिताः, नूतनानां रेलयान-सेवानाञ्च ध्वजप्रदर्शन-पूर्वकं शुभारम्भो विहितः। श्रीमोदी पी. एम. स्वनिधि-क्रेडिट्-कार्ड् इत्यमुमपि उद्घाटितवान्, एक-लक्षाधिकेभ्यश्च लाभार्थिभ्यः पी. एम. स्वनिधि-ऋणस्य वितरणम् अकरोत्। श्रीमोदी त्रीणि अमृत-भारत-एक्स्प्रेस-रेलयानानि, एकं यात्रिक-रेलयानम् आहत्य चतस्रः नूतनाः रेलयानसेवाः उद्घाटितवान् । एतदतिरिच्य, सः सी. एस. आई. आर.-एन्. आई. आई. एस. टी. इति नवान्वेषणस्य, तन्त्रज्ञानस्य, उद्यमशीलतायाः च केन्द्रस्य शिलान्यासं कृतवान् । सः नगरस्य श्रीचित्र-तिरुनाळ्-आयुर्विज्ञान-प्रौद्योगिकी-संस्थाने अत्याधुनिकस्य रेडियोसर्जरी-केन्द्रस्य शिलान्यासमपि कृतवान्, नूतनस्य पूजप्पुर-मुख्य-पत्रकार्यालयस्य उद्घाटनम् अकरोत् । तिरूवनन्तपुरम्-नगरे जनसमूहं सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत् एन. डी. ए-सर्वकारः सम्पर्कं, विज्ञानं तथा नवान्वेषणं, स्वास्थ्यसेवायां च महद्विनिवेशं कुर्वन् अस्ति । प्रधानमन्त्री मोदी अवदत् यत्, सम्पूर्णः देशः "विकसितभारत" इत्यस्य लक्ष्यं प्रति संयुक्तरूपेण कार्यं कुर्वन् अस्ति । सः इत्यपि अवदत् यत् केन्द्रसर्वकारः गतैकादश-वर्षेभ्यः नगरीयसंरचनायाः विषये बहु निवेशं कुर्वन् अस्ति ।

आय-कर-मूल्येषु कृतपरिष्काराणाम् उल्लेखं कुर्वन्, प्रधानमन्त्री अवदत् यत् केरलीय-मध्यमवर्गस्य जनाः अपि आय-कर-मुक्तेः लाभान् प्राप्तवन्तः । केन्द्र-सर्वकारः मूलस्तरे बैङ्किङ्ग इति वित्तकोशीय-सेवाः प्रदातुं अत्यन्तं प्रयतमानः अस्ति। अनेनैव जनाः बहु-सुलभतया वित्तकोषात् ऋणं प्राप्तुं समर्थाः अभवन्।

## पीएम-केरलसभा

अनन्तरं, प्रधानमन्त्रिणा नरेन्द्रमोदिना तिरुवनन्तपुरम्-नगरे जनसभायां भाजप-कार्यकर्तारः सम्बोधिताः। तिरुवनंतपुरं-नगरनिगम-निर्वाचने भाजपेति दलस्य विजयेन, वाम-जनतांत्रिक-

संघः ,संयुक्त-जनतांत्रिक-संघः इत्येतयोः दशकानां उपेक्षायाः समाप्तिः, विकासस्य सुशासनस्य च नवयुगस्य आरम्भः अस्तीति सूचितः।

## वैष्णवः-इंडियन मोबाइल

सूचना-प्रौद्योगिकी मंत्री अश्विनीवैष्णवः अकथयत् यत् आगामिषु अष्टादश-मासेषु भारतं स्वदेशप्रणाल्या निर्मितस्य मोबाईल-ब्राण्ड इत्यस्य उद्घाटनं करिष्यति। श्रीवैष्णवः दावोस इत्यत्र वर्ल्ड-इकोनॉमिक-फोरम इत्यस्य उपवेशनावसरे इमां सूचनां प्रायच्छत् । श्रीवैष्णवः प्रावोचत् यत् भारते एकं बृहत्तमम् इलेक्ट्रॉनिक्स-इकोसिस्टम् इत्येतत् अस्ति सहैव अधुना समयः समागच्छत् यदा भारतस्य पार्श्वे स्वदेशिप्रणाल्या विकसितः मोबाईल इति जङ्गमदूरभाषः अवश्यमेव स्यात् । तेन प्रोक्तं यत् वर्ल्ड-इकोनॉमिक-फोरम इत्यस्य उपवेशनावधौ भारतेन पूर्णरूपेण सुविकसित-तन्त्रैः सह महत्वपूर्णोपवेशनानि समायोजितानि इति ।

## जोशी-दावोस

नवीकरणीय-ऊर्जा-मंत्री प्रल्हादजोशी इत्येषः अकथयत् यत्  भारतस्य ऊर्जा-परिवर्तनेन औद्योगीकरणाय, रोजगार-सृजनाय , वैश्विकप्रतिस्पर्धायै च गतिः प्रदीयते, येन विकासशील-अर्थव्यवस्थायुत-राष्ट्रेभ्यः एकः आदर्शः प्रस्तूयते । दावोस इत्यत्र वर्ल्ड-इकोनॉमिक-फोरम इत्यस्मिन् एनर्जी: द ग्रेट फंडिंग गैप इत्यस्मिन् विषये एकं उच्चस्तरीयं सत्रं सम्बोधयन् मंत्रिवर्यः प्रोक्तवान् यत्  प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वे , भारतेन क्लीन-एनर्जी इत्येतत् जनाधारित-विकासांदोलनरूपेण परिवर्तितम् अस्ति ।

## नागरिकउड्डयन-योरोपियनयूनियन-भारतम्

भारतं यूरोपीयसंघः च  परिवहन-इकोसिस्टम् इत्यस्मिन्  यूरोप-भारतयोः पारस्परिकं सहयोगं अग्रे वर्धयितुं  सहमतौ अभवताम् । ह्यः दावोस इत्यत्र  वर्ल्ड-इकोनॉमिक-फोरम इत्यस्मिन् यूरोपीयसंघस्य परिवहन-आयुक्तः अपोस्टोलोस् इत्यनेन सह वार्ताविधौ , नागरिक-उड्डयन-मंत्री के-राममोहन-नायडू इत्येषः अकथयत् यत् उपवेशने  सस्टेनेबल-एविएशन-फ्यूल, नवाचार, पर्यावरणानुकूलपरिवहनं ,ग्रीन-एविएशन चेत्यादिषु विषयेषु प्राथमिकरूपेण चर्चा अभवत् ।

## सर्वकार-वेतनसंशोधनम्

केन्द्रसर्वकारेण सार्वजनिकक्षेत्रस्य जनरल-इंश्योरेंस इति संस्थानेभ्यः नेशनल-बैंक-फॉर-एग्रीकल्चर -एंड-रूरल-डेवलपमेंट (NABARD) इत्यस्मै च वेतनसंशोधनस्य स्वीकृतिः प्रदत्ता । भारतीय-रिजर्व-बैंकः , NABARD इत्यस्य च सेवानिवृत्त-कर्मचारिभ्यः निवृत्तिवेतन-संशोधनस्य अपि स्वीकृतिः प्रदत्ता अस्ति । वित्तमंत्रालयः प्रोक्तवान् यत् अद्य एतैः उपायैः न्यूनातिन्यूनं द्वाविंशत्यधिक-षट्-चत्वारिंशत्-सहस्र-कर्मचारिणः, सप्तत्यधिक-पञ्चशतोत्तर-त्रयोविंशति-सहस्र-निवृत्तिवेतन-उपभोक्तृणः, षष्ट्युत्तर-द्विशताधिक-त्रयोविंशति-सहस्र-पारिवारिक-निवृत्तिवेतन-उपभोक्तृणः च लाभान्विताः भविष्यन्ति ।

## गणतन्त्र-दिवसाभ्यासः

अद्य राष्ट्रिय-राजधान्यां कर्तव्य-पथि गणतन्त्र-दिवसस्य पथसञ्चलनस्य पूर्णाभ्यासः अभवत्। अभ्यासः कर्तव्यपथि भारतस्य समृद्धां परम्परां, सैन्यशक्तिं, सांस्कृतिकविविधतां च प्रादर्शयत्। विविधानां राज्यानां सशस्त्रसेनायाः विविधानां पदयात्रिसमूहानां, प्रदर्शिन्यः विविधानां बलानां, सांस्कृतिकसमावेशकतायाश्च प्रदर्शनानि प्रादर्शयन्।

## ऋतुविज्ञानविभागः

दीर्घकालात् प्रवर्तमानायाः शुष्कतायाः अनन्तरं, पाश्चात्य-विक्षोभकारणेन जम्मू-कश्मीर्, लद्दाख्, हिमाचलप्रदेशः, उत्तराखण्ड् इत्येतेषु प्रदेशेषु वृष्टिः, प्रचण्डः हिमपातः च भवति । भारतीय-ऋतुविज्ञान-विभागस्य अनुसारं सम्प्रति पश्चिम-हिमालय-प्रदेशं, समीपस्थानि क्षेत्राणि च एकं तीव्रतन्त्रं प्रभावयति। पञ्जाब्, हरियाणा, राजस्थान, उत्तरप्रदेश, दिल्ली, राष्ट्रियराजधानीक्षेत्र इत्यादिभिः सह उत्तर-पश्चिम-भारतस्य समतलप्रदेशेषु अपि मेघगर्जनेन सह सामान्यतः मध्यमवृष्टिः अभवत्।

**क्रिकेट्-**

क्रिकेट-क्रीडायाःटी-20 इति संस्करणे अद्य रायपुर्-नगरस्य शहीद्-वीर्-नारायण्-सिङ्घ्-अन्ताराष्ट्रिय-क्रीडाङ्गणे पञ्च-टी-20-अन्ताराष्ट्रिय-श्रृङ्खलायाः द्वितीया क्रीडा भारतन्यूज़ीलैण्ड्-देशयोर्मध्ये क्रीडिष्यते। प्रतियोगिता सायं सप्तवादने आरप्स्यते। नायकस्य सूर्यकुमार् यादव् इत्यस्य नेतृत्वे, आरम्भिकक्रीडायां अष्टचत्वारिंशत् धावनाङ्कैः भारतेन जयो लब्धः।